# Aghoramurti Stotram

# અઘોરમૂર્તિસ્તોત્રમ્

## Document Information

Text title : Aghoramurti Stotram

File name : aghoramUrtistotram.itx

Category : shiva,

Location : doc_shiva

Transliterated by : Sivakumar Thyagarajan Iyer shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan Iyer, PSA Easwaran

Latest update : January 15, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 14, 2020

*sanskritdocuments.org*

# અઘોરમૂર્તિસ્તોત્રમ્

અઘોરસ્તોત્રં
ૐ શ્રીગણેશાય નમઃ ।
શ્રીભૈરવ ઉવાચ-
કૈલાશશિખરાસીનં ભક્તાનુગ્રહકામ્યયા ।
પપ્રચ્છ પ્રણતા દેવી ભૈરવં વિગતામયમ્ ॥ ૧॥

બ્રહ્માદિકારણાતીતં સ્વશક્ત્યા નન્દિનિર્ભરમ્ ।
નમામિ પરમેશાનં સ્વચ્છન્દં વીરનાયકમ્ ॥ ૨॥

શ્રીદેવી ઉવાચ-
પ્રાયશ્ચિત્તેષુ સર્વેષુ સમયોલ્લઙ્ઘનેષુ ચ ।
મહાભયેષુ ઘોરેષુ તીવ્રોપદ્રવભૂમિષુ ॥ ૩॥

છિદ્રસ્થાનેષુ સર્વેષુ ઉપાયં વદ મે પ્રભો ।
યેનાયાસેન રહિતો નિર્દોષશ્ચ ભવેન્નરઃ ॥ ૪॥

શ્રીભૈરવ ઉવાચ -
શ ૃણુ  દેવિ પરં ગુહ્યં રહસ્યં પરમાદ્ભુતમ્ ।
સર્વપાપપ્રશમનં સર્વદુઃખાભયપ્રદમ્ ॥ ૫॥

પ્રાયશ્ચિત્તેષુ સર્વેષુ તીવ્રેષ્વપિ વિશોધનમ્ ।
સર્વચ્છિદ્રાપહરણં સર્વાર્તિવિનિવારણમ્ ॥ ૬॥

સમયોલ્લઙ્ઘને ઘોરે જપાદેવ વિમોચનમ્ ।
ભોગમોક્ષપ્રદં ચૈવ સર્વસિદ્ધિફલાવહમ્ ॥ ૭॥

શતં જાપ્યેન શુદ્ધ્યન્તિ મહાપાતકિનોઽપિ યે ।
તદર્દ્ધં પાતકં હન્તિ તત્પાદેનોપપાતકમ્ ॥ ૮॥

કાયિકં વાચિકં ચૈવ માનસં સ્પર્શદોષજમ્ ।
પ્રસાદાદિચ્છયા વાપિ સકૃજ્જપેન શુદ્ધ્યતિ ॥ ૯॥

યાગારમ્ભે ચ યાગાન્તે પઠિતવ્યં પ્રયત્નતઃ ।
નિત્યે નૈમિત્તકે કામ્યે પરસ્યાપ્યાત્મનોઽપિ વા ॥ ૧૦॥

નિછિદ્રકરણં પ્રોક્તમભાવપરિપૂરકમ્ ।
દ્રવ્યહીને મન્ત્રહીને જ્ઞાનયોગવિવર્જિતે ॥ ૧૧॥

ભક્તિશ્રદ્ધાવિરહિતે શુદ્ધિશૂન્યે વિશેષતઃ ।
મનોવિક્ષેપદોષે ચ વિલોમે પશુવીક્ષિતે ॥ ૧૨॥

વિધિહીને પ્રમાદે ચ જપ્તવ્યં સર્વકર્મસુ ।
નાતઃ પરતરો મન્ત્રો નાતઃ પરતરા સ્તુતિઃ ॥ ૧૩॥

નાતઃ પરતરા કાચિત્સમ્યક્ સત્યં ગિરા પ્રિયે ।
ઇયં સમયવિદ્યાનાં રાજરાજેશ્વરી સ્તુતિઃ ॥ ૧૪॥

પરમાપ્યાયનં દેવિ ભૈરવસ્ય પ્રકીર્તિતમ્ ।
પ્રીણનં સર્વદેવાનાં સર્વસૌભાગ્યવર્ધનમ્ ॥ ૧૫॥

સ્તવરાજમિમં પુણ્યં શૃણુષ્વાવહિતા પ્રિયે ।
ૐ નમઃ પરમાકાશશાયિને પરમાત્મને ॥ ૧૬॥

શિવાય પરમં શાન્તં ગિરાનન્દપદાય તે ।
અવાચ્યાય પ્રમેયાય પ્રમાત્રે વિશ્વહેતવે ॥ ૧૭॥

મહાસામાન્યરૂપાય સત્તામાત્રૈકરૂપિણે ।
ઘોષાદિદશધા શબ્દબીજભૂતાય શમ્ભવે ॥ ૧૮॥

નમઃ શાન્તોગ્રઘોરાદિ મન્ત્રસંરમ્ભગર્ભિણે ।
રેવતીસ્રજ વિશ્રમ્ભ સમાશ્લેષવિલાસિને ॥ ૧૯॥

નમઃ સમરસાસ્વાદપરાનન્દોપભોગિને ।
ભોગપાણયે નમસ્તુભ્યં યોગીશ પૂજિતાત્મને ॥ ૨૦॥

દ્વયનિર્મૂલનોદ્યોગસમુલ્લાસિતમૂર્તયે ।
હરપ્રસરવિક્ષોભવિસ્પષ્ટાક્ષરમૂર્ત્તયે ॥ ૨૧॥

નમો માયાસ્વરૂપાય સ્થાણવે પરમેષ્ઠિને ।
ઘોરસંસારસમ્ભોગદાયિને સ્થિતિકારિણે ॥ ૨૨॥

કાલાદિ ક્ષિતિપર્યન્તં પાલિને વિભવે નમઃ ।

રોહણાય મહામોહધ્વાન્તવિધ્વંસહેતવે ॥ ૨૩॥

હૃદયામ્બુજસઙ્કોચભેદિને શિવ માનવે ।
ભોગમોક્ષફલપ્રાપ્તિહેતુયોગવિધાયિને ॥ ૨૪॥

નમઃ પરમનિર્વાણદાયિને ચન્દ્રમૌલયે ।
ઘોષ્યાય સર્વમન્ત્રાણાં સર્વવાઙ્મયમૂર્તયે ॥ ૨૫॥

નમઃ શર્વાય સર્વાય સર્વપાપાપહારિણે ।
રવણાય રવાન્તાય નમોઽતરાવરાવિણે ॥ ૨૬॥

નિત્યાય સુપ્રબુદ્ધાય સર્વાન્તરતમાય તે ।
ઘોષાય પરનાદાન્તચરાય ખચરાય તે ॥ ૨૭॥

નમો વાક્પતયે તુભ્યં ભગાય પરરૂપિણે ।
રવણાય રતીશાર્ઙ્ગદેહિને ચિત્રકર્મણે ॥ ૨૮॥

નમઃ શૈલસુતામાત્રે વિશ્વકર્ત્રે મહાત્મને ।
નમો મારપ્રતિષ્ઠાય સર્વન્તિપદગાય તે ॥ ૨૬॥

નમઃ સમસ્તતત્ત્વાય વ્યાપિને ચિત્સ્વરૂપિણે ।
ખેદ્વારાય ભદ્રાય નમસ્તે રૂપરૂપિણે ॥ ૩૦॥

પરાપરપરિસ્પન્દમન્દિરાય નમોઽસ્તુ તે ।
ભરિતાખિલવિશ્વાય યોગગમ્યાય યોગિને ॥ ૩૧॥

નમઃ સર્વેશ્વરેશાય મહાહંસાય શમ્ભવે ।
ચર્વ્યાય ચર્વણીયાય ચર્વકાય ચરાય ચ ॥ ૩૨॥

રવીન્દુસન્ધિસંસ્થાય મહાચક્રેશ તે નમઃ ।
સર્વાનુસ્યૂતરૂપાય સર્વાચ્છાદકશક્તયે ॥ ૩૩॥

સર્વભક્ષાય શર્વાય નમસ્તે સર્વરૂપિણે ।
રમ્યાય વલ્લભાક્રાન્તદેહાર્ધાય વિનોદિને ॥ ૩૪॥

નમઃ પ્રસન્નદુષ્પ્રાપસૌભાગ્યફલદાયિને ।
તન્મહેશાય તત્ત્વાય વેદિને ભવભેદિને ॥ ૩૫॥

મહાભૈરવનાથાય ભક્તિગમ્યાય તે નમઃ ।
શક્તિગર્ભપ્રબોધાય શરણ્યાય શરીરિણે ॥ ૩૬॥

શાન્તિપુષ્ટ્યાદિસાધ્યાય સાધકાય નમો નમઃ ।
સ્વત્કુણ્ડલિનીગર્ભપ્રબોધપ્રાપ્તશક્તયે ॥ ૩૭॥

તત્સ્ફોટનપટુપ્રૌઢપરમાક્ષરરૂપિણે ।
સમસ્તવ્યસ્તસઙ્ગ્રસ્તરશ્મિજાલોદયાત્મને ॥ ૩૮॥

નમસ્તુભ્યં મહાસેનરૂપિણે વિશ્વગર્ભિણે ।
રેવારવસમુદ્ભૂતવહ્નિજ્વાલાવભાસિને ॥ ૩૯॥

ઘનીભૂતવિકલ્પાન્ધ્યવિશ્વબન્ધવિલાપિને ।
ભોગિનીસ્પન્દનારૂઢપ્રૌઢમાલબ્ધગર્વિણે ॥ ૪૦॥

નમસ્તે સર્વભક્ષાય પરમામૃતલોભિને ।
નભકોટિસમાવેશભરિતાખિલસૃષ્ટયે  ॥ ૪૧॥

નમઃ શક્તિશરીરાય કોટિદ્વિતયસઙ્ગિને ।
મહામોહસમાક્રાન્તજીવવર્ગવિબોધિને ॥ ૪૨॥

મહેશ્વરાય જગતાં નમઃ કારણબન્ધવે ।
સ્તેનોન્મૂલનદક્ષૈકત્રિતયે વિશ્વમૂર્ત્તયે ॥ ૪૩॥

નમસ્તેઽસ્તુ મહાદેવનામ્ને પરસુધાત્મને ।
રુગ્દ્રાવિણે મહાવીર્ય રુરુવંશવિનાશિને ॥ ૪૪॥

રુદ્રાય દ્રાવિતાશેષબન્ધનાય નમો નમઃ ।
દ્રવત્યરરસાસ્વાદચર્વણોદ્યુક્તયે નમઃ ॥ ૪૫॥

નમસ્ત્રિદશપૂજ્યાય સર્વકારણહેતવે ।
રૂપાતીત નમસ્તુભ્યં નમસ્તે બહુરૂપિણે ॥ ૪૬॥

ત્ર્યમ્બકાય ત્રિધા માતશ્ચારિણે ચ ત્રિચક્ષુષે ।
પેશલોપાયલભ્યાય ભક્તિભાજાં મહાત્મનામ્ ॥ ૪૭॥

દુર્લભાય મહાક્રાન્તચેતસાં તુ નમો નમઃ ।
ભયપ્રદાય દુષ્ટાનાં ભવાય ભયભેદિને ॥ ૪૮॥

ભવ્યાય ત્વન્મયાનાં તુ સર્વદાય નમો નમઃ ।
અણૂનાં મુક્તયે ઘોરઘોરસંસારદાયિને ॥ ૪૯॥

ઘોરાતિઘોરમૂઢાનાં તિરસ્કર્ત્રે નમોઽસ્તુ તે ।
ઇત્યેવં સ્તોત્રરાજેન્દ્રં મહાભૈરવભાષિતમ્ ॥ ૫૦॥

યોગિનીનાં પરં સારં ન દદ્યાદ્યસ્ય કસ્યાચિત્ ।
અદીક્ષિતે શઠે  ક્રૂરે નિસ્સત્યે શુચિવર્જિતે ॥ ૫૧॥

નાસ્તિકે ચ ખલે મૂર્ખે પ્રમત્તે વિલુપ્તેઽલસે ।
ગુરુશાસ્ત્રસદાચારદૂષકે કલહપ્રિયે ॥ ૫૨॥

નિર્દયે ચુમ્બકે ક્ષુદ્રે સમયઘ્નેઽથ દામ્ભિકે ।
દાક્ષિણ્યરહિતે પાપે ધર્મહીનેઽથ ગર્વિતે ॥ ૫૩॥

પશૂનાં સન્નિધૌ દેવિ નોચ્ચાર્યં સર્વથા ક્વચિત્ ।
અસ્ય સંસ્મૃતમાત્રસ્ય વિઘ્ના નશ્યન્તિ સર્વશઃ ॥ ૫૪॥

ગુહ્યકા યાતુધાનાશ્ચ વેતાલા રાક્ષસાદયઃ ।
ડામરાશ્ચ પિશાચાશ્ચ ક્રૂરસત્ત્વાશ્ચ પૂતનાઃ ॥ ૫૫॥

વ્યાધિદુર્ભિક્ષદૌર્ભાગ્યમારિમોહવિષાદયઃ ।
ગજવ્યાઘ્રાદયો દુષ્ટાઃ પલાયન્તે ચ સર્વશઃ ।
સર્વે દુષ્ટાઃ પ્રણશ્યન્તિ ઇત્યાજ્ઞા પારમેશ્વરી ॥ ૫૬॥

॥ ઇતિ અઘોરસ્તોત્રં સમાપ્તમ્ ॥

॥ શુભમસ્તુ ॥

Encoded by Sivakumar Thyagarajan Iyer shivakumar24 at gmail.com
Proofread by Sivakumar Thyagarajan Iyer, PSA Easwaran

*Aghoramurti Stotram*

pdf was typeset on January 14, 2020

Please send corrections to *sanskrit@cheerful.com*